**अध्याय: 5**

# पुस्तकानि शवगर्ताश्च अस्मान् किं बोधयन्ति ?

## पुस्तकालये मेरी



घण्टानाद-समनन्तरम् एव शिक्षकः छात्रान् आत्मना सह आगन्तुम् अवदत् । अद्य ते प्रथमवारं पुस्तकालयं गच्छन्तः आसन् । मेरी अपश्यत् यत् पुस्तकालयः तस्याः कक्षायाः अपेक्षया बहुविशालः आसीत् अपि च तत्र अनेकाः पुस्तकैः पूरिताः कपाटिकाः आसन् । तत्र कोणे एका कपाटिका आसीत् या स्थूलपुस्तकैः पूरिता आसीत् । कस्याश्चित् कपाटिकायाः उद्घाटनस्य प्रयासं कुर्वतीं मेरीं दृष्ट्वा अध्यापकः ताम् अवदत् "तस्यां कपाटिकायां विभिन्नधर्मसम्बद्धानि अनेकानि पुस्तकानि सन्ति । किं भवती जानाति यत् अस्माकं पार्श्वे वेदानाम् अपि कश्चित् सङ्ग्रहः अस्ति ?"
मेरी चिन्तयितुम् आरभत । "वेदः इति किम् ?" अधुना जानीमः ।

## संसारस्य प्राचीनतमेषु ग्रन्थेषु कश्चित् एकः

प्रायः भवती वेदानां विषये श्रुतवती स्यात् । चत्वारः वेदाः सन्ति – ऋग्वेदः सामवेदः यजुर्वेदः अथर्ववेदश्च । प्राचीनतमः वेदः ऋग्वेदः अस्ति, यस्य रचना प्रायः ३५००वर्षेभ्यः प्राक् अभूत् । ऋग्वेदे सहस्राधिकाः प्रार्थनाः सन्ति याः सूक्तयः इति कथ्यन्ते, सूक्तस्य अभिप्रायः अस्ति समीचीनप्रकारेण उक्तम् इति । एतानि सूक्तानि विभिन्नदेवीनां देवतानां च स्तुतिरूपेण रचितानि सन्ति । एतेषु देवतात्रयं बहुमहत्त्वपूर्णम् अस्ति - अग्निः इन्द्रः सोमः च । अग्निः वह्नेः देवता, इन्द्रः युद्धस्य देवता अपि च सोमः कश्चित् पादपविशेषः अस्ति येन किञ्चित् विशिष्टपेयं निर्मीयते स्म ।

वैदिकप्रार्थनानां रचनां ऋषयः कृतवन्तः आसन् । आचार्याः एताः प्रार्थनाः अक्षर-शब्द-वाक्येषु च विभज्य सस्वरपाठद्वारा कण्ठस्थं कारयन्ति स्म । अधिकांशसूक्तानां रचयितारः शिक्षार्थिपुरुषाः शिक्षकपुरुषाः च आसन् । कासाञ्चित् प्रार्थनानां रचनां महिलाः अपि कृतवत्यः आसन् । ऋग्वेदस्य भाषा प्राक्-संस्कृतं अथवा वैदिकसंस्कृतम् इति उच्यते । भवती विद्यालये यत् संस्कृतं पठति तस्य अपेक्षया इदं किञ्चित् भिन्नम् अस्ति ।

**संस्कृतम् अन्यभाषाः च**

संस्कृतभाषा भारोपीय-भाषा-परिवारस्य भागभूता अस्ति । असमिया गुजराती हिन्दी काश्मीरी सिन्धी चेति भारतस्य अनेकाः भाषाः एवञ्च यूरोपस्य आङ्ग्ल-फ्रांसीसी-जर्मन-यूनानी-इतालवी-स्पैनिशादयः बह्व्यः भाषाः अनेन परिवारेण एव सम्बद्धाः सन्ति इमाः एकभाषापरिवारः एतस्मात् कारणात् उच्यन्ते यतोहि आरम्भे एतासु अनेके शब्दाः एकसमानाः एव आसन् । उदाहरणार्थम् ''मातृ'' (संस्कृतम्) ''माँ'' (हिन्दी) अपि च ''मदर्'' (आङ्ग्लम्) इत्येतान् शब्दान् एव पश्यामः ।

किं भवती एतासु भाषासु परस्परं काञ्चित् समानतां पश्यति ?

उपमहाद्वीपे अन्यभाषापरिवाराणाम् अपि भाषाः भाष्यन्ते । तमिल-तेलगु-कन्नड-मलयालम इति द्रविड-भाषापरिवारस्य भाषाः सन्ति । किन्तु झारखण्डमध्यभारतयोः अनेकेषु भागेषु भाष्यमाणाः भाषाः आस्ट्रो-एशियाटिक-परिवार-सम्बद्धाः सन्ति ।

तासां भाषाणां सूचीं निर्मातु यासां विषये भवती श्रुतवती अस्ति । तासां भाषापरिवारान् परिचेतुं प्रयासं करोतु ।

वयं यानि पुस्तकानि पठामः तानि लिखितानि उट्टङ्कितानि च सन्ति । ऋग्वेदस्य उच्चारणं क्रियते स्म अपि च श्रवणं क्रियते स्म, न तु पठ्यते स्म । रचनायाः बहूनां शताब्दानां पश्चात् प्रथमवारम् एतस्य लेखनं कृतम् । एतस्य मुद्रणस्य कार्यं प्रायः प्रायः द्विशतवर्षेभ्यः पूर्वम् अभवत् ।

इतिहासकाराः ऋग्वेदस्य अध्ययनं कथं कुर्वन्ति ?

इतिहासकाराः पुरातत्त्वविदाम् इव अतीतस्य विषये सूचनाः एकत्रीकुर्वन्ति । परन्तु भौतिकावशेषान् अतिरिच्य ते लिखितस्रोतसाम् अपि उपयोगं कुर्वन्ति । आगच्छन्तु पश्यामः यत् ते ऋग्वेदस्य अध्ययनं कथं कुर्वन्ति ।

ऋग्वेदस्य कानिचन सूक्तानि वार्त्तालापस्य रूपेण सन्ति । विश्वामित्रर्षेः देवी-स्वरूपयोः पूजित-नद्योः (विपाशा-शतद्रोः) मध्ये कश्चित् संवादः एतादृशस्य एव सूक्तस्य अंशः अस्ति ।

एतयोः द्वयोः नद्योः अन्वेषणं प्रथमे मानचित्रे (पृष्ठम्-२) करोतु अपि च पुनः पठतु ।

ऋग्वेदस्य पाण्डुलिपेः किञ्चन पृष्ठम् । भूर्जवृक्षस्य त्वचि लिखितः इयं पाण्डुलिपिः काश्मीरेषु प्राप्ता आसीत् । प्रायः १५० वर्षेभ्यः पूर्वं ऋग्वेदस्य मुद्रणार्थम् एतस्य प्रयोगः कृतः आसीत् । एतं पाण्डुलिपिं दृष्ट्वा एव ऋग्वेदस्य आङ्ग्लानुवादः जातः आसीत् । अयं पाण्डुलिपिः पुणे-महाराष्ट्रस्य कस्मिंश्चित् पुस्तकालये सुरक्षिता अस्ति ।



विश्वामित्रः नद्यौ च

विश्वामित्रः- हे नद्यौ ! द्युतिमत्योः गावोः इव वत्सान् स्निह्यन्त्यौ अपि च जवयुक्ताश्वयोः गतिः इव पर्वतेभ्यः नीचैः अवतरताम् । इन्द्रेण प्रदत्तशक्त्या स्फूर्तिमत्यौ भवत्यौ रथानां गत्या इव सागरं प्रति वहन्त्यौ स्तः । जलेन परिप्लुते भवत्यौ परस्परं मेलितुम् इच्छतः ।

नद्यः – जलेन परिपूर्णाः वयं देवनिर्मितमार्गेण चलामः । एकदा निर्गते सति अस्मान् कोऽपि न रोद्धुं शक्नोति । ऋषे ! किमर्थं भवान् आवां प्रार्थयति ?

विश्वामित्रः- भगिन्यौ ! गायकस्य मम प्रार्थनां श्रृणुताम् । अहं रथैः वाहनसहितः सुदूरात् आगतवान् अस्मि । कृपां कृत्वा स्वजलानि अस्माकं रथेभ्यः अक्षेभ्यः च उपरि न उत्थापयन्तु यतः वयं सरलतया तस्मिन् पारं गन्तुं पारयेम ।

नद्यः- वयं भवतां प्रार्थनाः श्रोष्यामः यतः भवन्तः सर्वे सुरक्षिताः सन्तः तस्मिन् तटे गन्तुं शक्नुयुः ।

इतिहासकाराः ज्ञापयन्ति यत् इयं प्रार्थना तस्मिन् क्षेत्रे रचिता स्यात् यस्मिन् क्षेत्रे एते नद्यौ प्रवहतः । ते इदम् अपि बोधयन्ति यत् यस्मिन् समाजे ऋषयः निवसन्ति स्म तत्र अश्वानां गवां च कृते बहु महत्त्वं दीयते स्म । अतः नदीनां सादृश्यं अश्वगोभिः सह दर्शिता अस्ति ।

किं भवती अनुभवति यत् रथाः अपि महत्त्वपूर्णाः आसन् ? उत्तरप्राप्तये कारणं वदन्तु । प्रार्थनायाः पङ्क्तीः पुनः पठित्वा बोधयन्तु यत् तासु परिवहणस्य कृते केषां केषां साधनानाम् उल्लेखः अस्ति ।

ऋग्वेदस्य प्रार्थनासु अन्यसाम् अपरनदीनां विशेषतया सरस्वती-सिन्ध्वोः तयोः च सहायकनदीनाम् अपि वर्णनम् अस्ति। गङ्गा-यमुनयोः उल्लेखः केवलम् एकस्मिन् स्थले कृतः अस्ति ।

प्रथमं मानचित्रं पश्यन्तु अपि च एतादृशीनां पञ्चनदीनां सूचीं कुर्वन्तु यासां नामानि ऋग्वेदे न सन्ति ।

## पशवः अश्वाः रथाः च

ऋग्वेदे पशूनां बालानाम् (विशेषतया पुत्राणाम्) अश्वानां च प्राप्तये अनेकाः प्रार्थनाः सन्ति। अश्वाः युद्धे रथान् कर्षणस्य कार्ये आनीयन्ते स्म। एतेषु युद्धेषु पशवः विजित्य आनीयन्ते स्म। एतेषु युद्धेषु पशवः विजित्य आनीयन्ते स्म। युद्धानि कदाचित् यत्र सुगोचारणानि स्युः अथवा यत्र यवसदृशानि सस्यानि शीघ्रम् उत्पादयितुं शक्नुयुः तादृशस्य भूभागस्य उपरि आधिपत्यस्थापनाय क्रियन्ते स्म। कानिचन युद्धानि जलस्य स्रोतनिमित्तानि अपि च जनान् कारागारे निग्रहीतुम् अपि क्रियन्ते स्म।

युद्धेषु जितधनस्य कश्चन भागः सेनानायकाः स्वस्य समीपे स्थापयन्ति स्म अपि च कश्चित् भागः पुरोहिताय दीयते स्म। अवशिष्टं धनं सामान्यजनेषु वण्ट्यते स्म। किञ्चित् धनं यष्टुं प्रयुज्यते स्म। यज्ञस्य अग्नौ आहुतयः दीयन्ते स्म। एताः आहुतयः देवानां देवीनां च कृते दीयन्ते स्म। घृतस्य अन्नस्य कदाचित् च पशूनाम् अपि आहूतयः दीयन्ते स्म।

अधिकांशपुरुषाः एतेषु युद्धेषु भागं गृह्णन्ति स्म। काचित् स्थायिनी सेना न भवति स्म परन्तु जनाः सभासु परस्परं मिलन्ति स्म अपि च युद्धस्य शान्तेः च विषये परामर्शं यच्छन्ति स्म। तत्र एतादृशाः जनाः स्वसेनानायकान् चिन्वन्ति स्म ये परमयोद्धारः वीराः च भवेयुः।

## जनानां विशेषतानां अभिधायकाः शब्दाः

जनानां वर्गीकरणं कार्य-भाषा-परिवार-समुदाय-निवासस्थान-सांस्कृतिक-परम्पराणां च आधारेण क्रियते स्म । ऋग्वेदे जनानां विशेषता-प्रतिपादकान् केचन शब्दान् पश्यतु ।

पुरोहिताः राजनः इति द्वौ एतादृशौ द्वौ समूहौ स्तः ययोः वर्गीकरणं कार्यस्य आधारेण कृतम् अस्ति । पुरोहिताः ये कदाचित् ब्राह्मणाः अपि उच्यन्ते स्म विभिन्न-यज्ञानुष्ठानानि कुर्वन्ति स्म । अपरे जनाः आसन्- राजानः ।

एते राजानः तादृशाः न आसन् येषां विषये भवती पश्चात् पठिष्यति । एते न तु विशालराजधानीषु अथवा प्रासादेषु निवसन्ति स्म न एतेषां समीपे सेनाः आसन् न तु एते राजस्वं स्वीकुर्वन्ति स्म । प्रायः राज्ञः मृत्योः पश्चात् तस्य पुत्रः स्वयमेव शासकः न भवति स्म ।

गतानुभागं एकदा पुनः पठतु अपि च एतत् अवगमनस्य प्रयासं करोतु यत् राजानः किं कुर्वन्ति स्म ।

जनतायाः सम्पूर्णस्य समुदायस्य च कृते द्वयोः शब्दयोः प्रयोगः भवति स्म । एकः शब्दः आसीत् जनः इति यस्य प्रयोगः हिन्दीभाषायाम् अन्यभाषायां च अद्य अपि भवति । अपरः आसीत् विश् इति यतः वैश्यः इति शब्दस्य उत्पत्तिः जाता अस्ति । एतस्मिन् विषये भवती विस्तरेण षष्ठाध्याये पठिष्यति ।

ऋग्वेदे विश्, जन इति शब्दयोः च नामानि लभ्यन्ते । अतः वयं तत्र पुरू-जन इति अथवा विश् इति, भरत-जन इति अथवा विश्,यदु-जन इति अथवा विश्सदृशानाम् अनेकेषां नाम्नाम् उल्लेखं प्राप्नुमः ।

किं भवत्यै एतेषु नामसु किञ्चन नाम परिचितम् इव प्रतिभाति ?

यैः जनैः एताः प्रार्थनाः रचिताः ते कदाचित् आत्मनः कृते आर्यः इति शब्दस्य व्यवहारं कुर्वन्ति स्म तथा च स्वविरोधिभ्यः दासः अथवा दस्युः इति शब्दस्य प्रयोगं कुर्वन्ति स्म । दस्यवः ते जनाः आसन् ये न यजन्ते स्म अपि च प्रायः अन्यासां भाषाणां प्रयोगं कुर्वन्ति स्म । अनन्तरकाले दास इति शब्दस्य अर्थः गुलाम इति अभवत् स्त्रीलिङ्गे दासी च इति अभवत् । दासाः दास्यः च इति ते स्त्रीपुरुषाः भवन्ति स्म ये युद्धेषु निगृह्यन्ते स्म स्म । ते तस्य स्वामिनः सम्पत्तिरूपाः इति मन्यन्ते स्म । तैः च तत् सर्वं कार्यं करणीयं भवति स्म यत् यत् स्वामी इच्छति स्म ।

यस्मिन् काले उपमहाद्वीपस्य उत्तरपश्चिमयोः भागयोः ऋग्वेदस्य रचना जायते स्म तस्मिन् एव समये अन्येषु स्थानेषु कश्चित् भिन्नप्रकारकः विकासः जायते स्म । पश्यतु, तत्र किं भवति स्म ।

## मौनप्रहरी – महापाषाणानां कथा

अग्रिमपृष्ठस्य चित्राणि पश्यतु।

एते शिलाखण्डाः महापाषाण-नाम्नः अवगम्यन्ते । एते पाषाणाः शवस्य भूमिसात्काले तस्मिन् स्थाने जनैः महत्या सुव्यवस्थया संश्लिष्यन्ते स्म। महापाषाण-शवस्थाननिर्माणस्य प्रथा प्रायः ३०००वर्षेभ्यः पूर्वम् आरब्धा। इयं प्रथा दक्कन-दक्षिण-भारतोत्तरपूर्वभारतेषु काश्मीरेषु च प्रचलिता आसीत्।

कानिचन महत्त्वपूर्णानि महापाषाण-पुरास्थलानि द्वितीये मानचित्रे दर्शितानि सन्ति । केचन महापाषाणाः भूमेः उपरि एव दृष्टाः भवन्ति। केचन महापाषाणाः भूमेः अन्तः अपि भवन्ति।

बहुधा पुरातत्त्वविदः गोलाकारान् पाषाणान् प्राप्नुवन्ति । कदाचित् एकाकी स्थिरः पाषाणः लभ्यते । एतानि एव एकमात्रं प्रमाणानि सन्ति यानि भूमिम् अधः शवस्थानानि दर्शयन्ति।

महापाषाणानां निर्माणाय जनैः अनेकप्रकारकाणि कार्याणि करणीयानि भवन्ति स्म। अस्माभिः येषां कार्याणां सूची रचिता अस्ति तानि क्रमबद्धानि करोतु। गर्तखननम्, ऊढ्वा शिलाखण्डानां आनयनम्, महापाषाणानां विलेखनं अपि च मृतानां भूमिसात्करणम्।

एतेषु शवाधानेषु काश्चन समानताः सन्ति । सामान्यतः मृतकाः विशिष्टप्रकारस्य मृत्तिकायाः पात्रैः सह भूमौ स्थाप्यन्ते स्म ये कृष्ण-रक्त-मृत्तिकायाः पात्रैः ज्ञायन्ते स्म । एतेन सार्धम् एव तत्र लौहस्य शस्त्राणि अश्वस्य अस्थिपञ्जराः अपि च वस्तूनि पाषाणाः सुवर्णस्य च आभूषणानि अपि सन्ति।



उपरि-एतादृशस्य महापाषाणस्य कृते ताबूत-शवाधानं (सिस्ट) इति उच्यते । अत्र दर्शिते शवाधाने कश्चित् पोर्ट-होल (महान् गर्तः) अस्ति यः प्रायः पाषाणनिर्मितप्रकोष्ठं गन्तुं मार्गः आसीत् ।





### किं हड्प्पायाः नगरेषु लौहस्य प्रयोगः भवति स्म ?

महापाषाणप्रेतभूमिभ्यः प्राप्तलौहस्य उपकरणानि

वामतः – अश्वस्य उपकरणानि

अधः वामतः – परशवः

अधः - काचित् असिः



### जनानां सामाजिकासमानतानां विषये अवबोधनम्

पुरातत्त्वविदः इदं मन्यन्ते यत् अस्थिपञ्जरेण सह प्राप्यमानानि वस्तूनि अवशेषाः वा मृतस्य जनस्य एव स्युः । कदाचित् एकस्य शवस्थानस्य अपेक्षया अपरस्मिन् शवस्थाने अधिकानि वस्तूनि लभ्यन्ते । द्वितीये मानचित्रे ब्रह्मगिरिम् अन्विष्यन्तु । अत्र कस्यचित् जनस्य शवाधानस्थाने (कब्र) ३३सुवर्णमणिकाः अपि च शङ्खाः प्राप्ताः सन्ति । अपरेषाम् अस्थिपञ्जराणां पार्श्वे केवलं कानिचन मृत्पात्राणि एव प्राप्तानि सन्ति । इदं शवधाने स्थापितजनानां सामाजिकस्थितौ भिन्नतां दर्शयति । केचन जनाः धनिकाः आसन् अपि च केचन जनाः निर्धनाः आसन् केचन जनाः नायकाः आसन् अपि च अन्ये अनुयायिनः आसन् ।

### किं काश्चन शवशयनकिं काश्चन प्रेतभूमयः विशिष्टकुटुम्बानां कृते आसन् ?

क्वचित् क्वचित् महापाषाणेषु एकाधिकाः अस्थिपञ्जराः अलभ्यन्त । तानि इदं दर्शयन्ति यत् प्रायः एकस्य एव परिवारस्य जनाः एकस्मिन् एव स्थाने पृथक्-पृथक्-काले श्मशाने स्थापिताः आसन् । अनन्तरकाले मृताः जनाः पोर्ट-होलस्य मार्गेण प्रेतस्थानेषु आनीय स्थाप्यन्ते स्म । एतादृशे स्थाने गोलाकार-संश्लिटपाषाणाः अथवा महाप्रस्तराः (चट्टान) चिह्नानां कार्याणि कुर्वन्ति स्म यत्र जनाः आवश्यकतानुसारं शवानां भूमौ स्थापनाय निखननाय वा पुनः आगन्तुं शक्नुवन्ति स्म ।

### कस्यचित् इनामग्रामस्य विशिष्टजनस्य समाधिस्थलम्

द्वितीये मानचित्रे चतुर्दशे पृष्ठे च इनामग्रामम् अन्विष्यन्तु । इदं भीमायाः सहायकनद्याः इत्यस्याः तटे किञ्चन स्थानम् अस्ति । यस्मिन् स्थाने ३६००तः २७०० वर्षेभ्यः पूर्वं जनाः निवसन्ति स्म । अत्र वयस्कजनाः प्रायः गर्ते

ऋजुतया शाययित्वा भूमौ स्थाप्यन्ते स्म। तेषां शिरांसि उत्तरदिशां प्रति भवन्ति स्म। बहुधा ते गृहस्य अन्तः एव भूमौ स्थाप्यन्ते स्म। एतादृशानि पात्राणि येषु प्रायः भोजनं जलं वा स्यात् भूमौ स्थापितस्य शवस्य समीपे स्थाप्यन्ते स्म।

कश्चित् जनः पञ्चप्रकोष्ठात्मकस्य भवनस्य प्राङ्गणे चतुष्पादयुक्त-मृण्मयपेटिकायां भूमेः अधः स्थापितः आसीत्। ग्रामस्य मध्ये स्थितम् एतत् गृहं ग्रामस्य सर्वेषु गृहेषु दीर्घतमम् आसीत्। अस्मिन् गृहे कश्चन भाण्डागारः आसीत्। शवस्य पादौ आकुञ्चितौ आस्ताम्।

किं भवती अनुभवति यत् अयं कस्यचित् नायकस्य शवः आसीत्? स्वस्य उत्तरं सकारणं वदतु।

### अस्थिपञ्जराणाम् अध्ययनम् अस्मान् किं बोधयति

लघ्वाकारस्य आधारेण कस्यचित् शिशोः अस्थिपञ्जरं सरलतया परिचेतुं शक्नुमः। परन्तु कस्याश्चित् बालिकायाः कस्यचित् बालकस्य च अस्थिपञ्जरे कश्चन महान् भेदः न भवति।

किं वयं ज्ञातुं शक्नुमः यत् अस्थिपञ्जरः कस्यचित् पुरुषस्य आसीत् अथवा कस्याश्चित् महिलायाः आसीत्?

कदाचित् जनाः अस्थिपञ्जरेण सह प्राप्तवस्तूनाम् आधारेण ऊहां कुर्वन्ति। उदाहरणार्थं यदि अस्थिपञ्जरेण सह आभूषणानि लभ्यन्ते तर्हि बहुधा एवं मन्यते यत् अयम् अस्थिपञ्जरः कस्याश्चित् महिलायाः अस्ति। परन्तु एतादृशया ऊहया सह समस्याः अपि सन्ति। प्रायः पुरुषाः अपि आभूषणानि धरन्ति स्म।

अस्थिपञ्जरस्य लिङ्गज्ञानाय कश्चित् सरलः उपायः अस्ति तस्य अस्थ्नां निरीक्षणम्। यतो हि महिलाः शिशून् सूयन्ते तस्मात् कारणात् तासां कटिप्रदेशः नितम्बः वा पुरुषाणाम् अपेक्षया गुरुतरः भवति।

इदम् अवगमनम् अस्थिपञ्जराणाम् आधुनिकाध्ययने आधारितम् अस्ति।

वर्तमान-कालात् प्रायः २०००वर्षेभ्यः पूर्वं चरकनामकः कश्चित् प्रसिद्धवैद्यः बभूव। सः चिकित्साशास्त्र-सम्बद्धं चरक-संहिता-नामकं पुस्तकं लिलेख। सः कथयति यत् मनुष्यस्य शरीरे ३६०अस्थीनि भवन्ति। एतानि आधुनिक-शरीर-रचना-विज्ञानेन परिगणितेभ्यः २०६ अस्थिभ्यः अधिकानि सन्ति। सम्भवतः चरकः स्वस्य गणनायां दन्त-अस्थिसन्धीः कार्टिलेजं च योजयित्वा इमां सङ्ख्यां बोधयामास।

भवत्याः अनुसारं शरीरस्य विषये सः एतावतीं विस्तृतसूचनां कथम् एकत्रीकृतवान् स्यात्?

### इनामग्रामस्य जनानां व्यवसायाः

इनामग्रामे पुरातत्त्ववैज्ञानिकाः गोधूम-यव-तण्डुल-द्विदल-प्रियङ्गु-हरेणु-तिलानां च बीजानि प्राप्नुवन्। ते अनेकेषां पशूनां अस्थीनि अपि प्राप्तवन्तः सन्ति। अनेकेषु अस्थिषु कर्तन-चिह्नैः ऊह्यते यत् जनाः पशून् खादन्ति स्म। गो-वृषभ-महिषी-अजा-अवि-कुक्कुर-घोटक-गर्दभ-सूकर-हरिण-चित्रमृग-कृष्णमृग-खरहा-नकुल-चटका-मकर-कच्छप-कर्क-मत्स्यानां च अस्थीनि प्राप्तानि सन्ति। एतादृशानि साक्ष्याणि अलभ्यन्त यत् बदरी-जम्बु-खर्जूराः अपि च अनेकविधानि रसपूर्णफलानि अपि एकत्रीक्रियन्ते स्म।

अस्य प्रमाणस्य आधारेण इनामग्रामस्य जनानां व्यवसायानां सूचीं निर्मातु ।

**अन्यत्र**

मानचित्रे चीनदेशं पश्यतु । प्रायः ३५०० वर्षेभ्यः पूर्वं वयं तत्रत्य-लेखनकलायाः प्राचीनतमानि उदाहरणानि प्राप्नुमः ।

एषः लेखः पशूनाम् अस्थिषु लिखितः आसीत् । एतानि अस्थीनि भविष्यवक्तॄणि अस्थीनि उच्यन्ते स्म यतो हि इयं मान्यता आसीत् यत् एतानि भविष्यं

ज्ञापयन्ति । राजानः लिपिकारैः एतेषु अस्थिषु प्रश्नान् लेखयन्ति स्म- किं ते युद्धानि जेष्यन्ति ? किं सस्यानि समीचीनानि भविष्यन्ति ? किं ते पुत्रवन्तः भविष्यन्ति ? पुनः तानि अस्थीनि अग्नौ निपात्यन्ते स्म यत्र औष्ण्यत्वात् तेषु विभेदनं भवति स्म दैवज्ञाः भेदान् ध्यानेन दृष्ट्वा भविष्यत्कथनस्य प्रयासं कुर्वन्ति स्म । यथा प्रायः भवत्याः अपि चिन्तनं स्यात् यत् ते भविष्यवक्तारः कदाचित् दोषान् अपि आचरन्ति स्म ।

एते राजानः नगरेषु प्रासादान् निर्माय निवसन्ति स्म । ते प्रकूतधनसम्पदः एकत्रीकृतवन्तः आसन् यत्र विशालानि कांस्यपात्राणि विलिख्य स्थापितानि आसन् । परन्तु ते लौहं प्रयोक्तुं न जानन्ति स्म ।



उपयोगिशब्दाः
वेदः, प्रार्थना
भाषा
रथः, यज्ञः
राजा, दासः
महापाषाणः,
प्रेतभूमिः
अस्थिपञ्जरः,
लौहः

कल्पनां करोतु

भवती ३०००वर्षेभ्यः पूर्वतने इनामग्रामे निवसति । गतनिशि नायकस्य मृत्युः अभवत् । अद्य भवत्याः मातापितरौ तं प्रेतभूमौ स्थापितुं सज्जां कुरुतः । इदं ज्ञापयन्ती सम्पूर्णस्य दृश्यस्य वर्णनं करोतु यत् अन्तिम-संस्काराय कीदृशं भोजनं सज्जीक्रियते । भवती किम् अनुभवति, भोजने किं दास्यते ?

## आगच्छन्तु स्मरणं कुर्मः



१. निम्नलिखितानां सुमेलनं करोतु-

| | |
|---|---|
| सूक्तम् | अलङ्कृतपाषाणाः |
| रथः | अनुष्ठानम् |
| यज्ञः | समीचीनतया उक्तम् |
| दासः | युद्धे प्रयुज्यते स्म |
| महापाषाणः | गुलाम पराधीनः इति |

२. वाक्यानि पूरयतु

(क) ____________ दासानां प्रयोगः क्रियते स्म ।

(ख) ________ महापाषाणाः प्राप्यन्ते ।

(ग) भूमौ गोलके संश्लेषितपाषाणाः अथवा महाप्रस्तराः _________कार्यं कुर्वन्ति स्म ।

(घ) पोर्ट-होलस्य प्रयोगः ________ भवति स्म ।

(ङ) इनामग्रामस्य जनाः __________खादन्ति स्म ।

## आगच्छतु चर्चां कुर्मः



३. वयम् अद्य यानि पुस्तकानि पठामः तानि ऋग्वेदतः कथं भिन्नानि सन्ति ?

४. पुरातत्त्वविज्ञानिभिः प्रेतभूमौ स्थापितजनानां मध्ये सामाजिकस्य भेदस्य ज्ञानं कथं क्रियते ?

५. कस्यचित् राज्ञः जीवनं दासदास्योः जीवनात् कथं पृथक् आसीत् ?

## आगच्छतु कृत्वा पश्यामः



६. जानातु यत् भवत्याः विद्यालयस्य पुस्तकालये धर्मस्य विषये पुस्तकानि सन्ति अथवा न सन्ति । तस्मात् सङ्ग्रहात् केषाञ्चित् पञ्च पुस्तकानां नामानि ज्ञापयतु ।

७. काञ्चित् कवितां किञ्चित् गीतं वा लिखतु । भवती तां कवितां तत् गीतं च श्रुत्वा स्मृतवती आसीत् अथवा पठित्वा ?

### काश्चन महत्त्वपूर्णतिथयः

- वेदानां रचनायाः आरम्भः(प्रायः ३५००वर्षेभ्यः पूर्वम्)
- महापाषाणानां निर्माणस्य प्रारम्भः (प्रायः ३००० वर्षेभ्यः पूर्वम्)
- इनामग्रामे कृषकाणां निवासः (३६००तः २७००वर्षेभ्यः पूर्वम्)
- चरकः (प्रायः २०००वर्षेभ्यः पूर्वम्)

८. ऋग्वेदे जनानां वर्गीकरणं तेषां कार्याणाम् भाषायाः च आधारेण क्रियते । अधोलिखित-तालिकायां भवती षड् परिचितजनानां नामानि पूरयतु । एतेषु तिस्रः महिलाः त्रयः पुरुषाः च भवेयुः । प्रत्येकं जनस्य व्यवसायं भाषां च लिखतु । किं भवती तस्मिन् विवरणे इतोऽपि कञ्चित् विषयं योक्तुम् इच्छति ?

| नाम | कार्यम् | भाषा | अन्यः |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

**इति पञ्चमोऽध्यायः**